॥ श्रीजिनाय नमः ॥

(सान्वयगूर्जरभाषांतरसहितंच)

# ॥ श्री श्रीषेणचरित्रम् ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भाषांतर करनारतथा छपावी प्रसिद्धकरनार-पंडित श्रावक हीरालाल हंसराज

(अन्वय तथा भाषांतरना प्रसिद्धकर्ताए सर्व हक स्वाधीन राख्या छे,)

संवत् १९८४ सने १९२८ वीर संवत् २४५४

किंमत रु. १-४-०

श्रीजैनभास्करोदय प्रिन्टिंग प्रेसमां छाप्युं. जामनगर ब्रांच नं. ३.

॥ श्रीजिनाय नमः ॥

(सान्वयगूर्जरभाषांतरसहितंच)

# ॥ अथ श्री श्रीषेणचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भाषांतरकरनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

**अस्तीह स्तुतविस्तारा ताराख्या रुचिरा पुरी । यार्कतापेन न क्लिष्टा कीर्णा कोटिध्वजाञ्चलैः ॥ १ ॥**

अन्वयः—इह स्तुत विस्तारा ताराख्या रुचिरा पुरी अस्ति, या कोटिध्वज अंचलैः कीर्णा अर्क तापेन न क्लिष्टा. ॥ १ ॥

अर्थः-अहीं प्रशंसनीय विस्तारवाळी तारा नामनी मनोहर नगरी छे, के जे करोडपतिओना ( मकानोपर उडती ) धजाओना छेडाओवडे भरेली होवाथी सूर्यना तापथी खेद पामती नहोती. ॥ १ ॥

**तत्र शास्त्रपवित्रार्थकृतार्थीकृतचेतनः । तारापीड इति क्ष्मापः स्थापको नयधर्मयोः ॥ २ ॥**

अन्वयः-तत्र शास्त्र पवित्र अर्थ कृतार्थीकृत चेतनः, नय धर्मयोः स्थापकः तारापीड इति क्ष्मापः. ॥ २ ॥

अर्थः—ते नगरीमां शास्त्रोना पवित्र अर्थोवडे कृतार्थ करेल छे आत्मा जेणे, एवो, तथा न्याय अने धर्मनी व्यवस्था करनारो

तारापीडनामे राजा हतो. ॥ २ ॥

**तन्मित्रं संपदां पात्रं पुत्रः श्रीपतिमन्त्रिणः । श्रीषेणसंज्ञः स्वप्रज्ञाज्ञातज्ञातव्यवैभवः ॥ ३ ॥**

अन्वयः-संपदां पात्रं, स्व प्रज्ञा ज्ञात ज्ञातव्य वैभवः श्रीपति मंत्रिणः श्रीषेणसंज्ञः पुत्रः तन्मित्रं ॥ ३ ॥

अर्थः—संपदाना भाजनसरखो, तथा पोतानी बुद्धिथी जाणेल छे, जाणवालायक पदार्थोनुं ज्ञान जेणे, एवो श्रीपतिनामना मंत्रिनो श्रीषेण नामे पुत्र ते राजानो मित्र हतो. ॥ ३ ॥

**अन्यदा प्रमदालोकलोललोचनलोकितः । वसन्ते रन्तुमुद्यानं स ययौ नवयौवनः ॥ ४ ॥**

अन्वयः—प्रमदा लोक लोल लोचन लोकितः, नव यौवनः सः अन्यदा वसंते रंतुं उद्यानं ययौ. ॥ ४ ॥

अर्थः स्त्रीओनी चपल आंखोवडे जोवायेलो, तथा नवां यौवनवाळो ते श्रीषेण एक दिवसे वसंतऋतुमां क्रीडा करवामाटे बगीचामांगयो.

**ललन्तो ललना तत्र नेत्रपत्रसुधाञ्जनम् । ददृशे पुण्यलावण्यपण्यापणमिवामुना ॥ ५ ॥**

अन्वयः—तत्र अमुना नेत्र पत्र सुधा अंजनं, पुण्य लावण्य पण्य आपणं इव ललंती ललना ददृशे. ॥ ५ ॥

अर्थः-त्यां तेणे चक्षुमां अमृतना अंजन सरखी, तथा मनोहर लावण्यरूपी करीयाणानी दुकान सरखी क्रीडा करती स्त्रीने दीठी.

**एषा श्रीषेणमेणाक्षी वीक्ष्य साक्षान्मनोभवम् । दक्षं कटाक्षविक्षेपलक्षैरुत्क्षिप्य हृद्यधात् ॥ ६ ॥**

अन्वयः-एणाक्षी सा दक्षं श्रीषेणं साक्षात् मनोभवं वीक्ष्य कटाक्ष विक्षेप लक्षैः उत्क्षिप्य हृदि अधात्. ॥ ६ ॥

अर्थः—हरिणसरखां नेत्रोवाळी ते स्त्रीए ते चतुर श्रीषेणने साक्षात् कामदेवसरखो जोइने लाखोगमे कटाक्षोवडे उछाळीने पो-

ताना हृदयमां धारण कर्यो. (अर्थात् तेणीए कटाक्षोरूपी बाणो मारीने तेने वश करी लीधो ) ॥ ६ ॥

**अन्योन्यं दर्शनातृप्तावन्योन्यमनुरागिणौ । स्वस्वावसथमस्वस्थौ जग्मतुस्तौ दिनात्यये ॥ ७ ॥**

अन्वयः-अन्योन्यं दर्शन अतृप्तौ, अन्योन्यं अनुरागिणौ, अस्वस्थौ तौ दिन अत्यये स्व स्व आवसथं जग्मतुः ॥ ७ ॥

अर्थः—परस्पर जोवामां तृप्ति नही पामेला, परस्पर प्रेममां पडेला, ( अने तेथी ) व्याकुल थयेला तेओ बन्ने सूर्य अस्त थया-बाद पोतपोताने घेर गया. ॥ ७ ॥

**ग्रस्तस्तत्र मृगीनेत्रावियोगेन स मन्त्रिभूः । निशिनिद्रादरिद्रोऽयमित्यमुद्रमचिन्तयत् ॥ ८ ॥**

अन्वयः-तत्र मृगीनेत्रा वियोगेन ग्रस्तः सः अयं मंत्रिभूः निशि निद्रा दरिद्रः अमुद्रं इति अचिंतयत्. ॥ ८ ॥

अर्थः-त्यां स्त्रीना वियोगथी व्याकुल थयेलो ते आ मंत्रिकुमार रात्रिए निद्रा न आववाथी अस्खलितपणे एम विचारवा लाग्यो के,

**अहो रूपमहो कान्तिरहो नयनविभ्रमः । अहो स्नेहानुबन्धश्च तस्याः शस्यावधेर्मयि ॥ ९ ॥**

अन्वयः-शस्य अवधेः तस्याः अहो ! रूपं ! अहो ! कांतिः ! अहो ! नयन विभ्रमः ! च अहो ! मयि स्नेह अनुबंधः ! ॥९॥

अर्थः—प्रशंसानी सीमासरखी एवी ते स्त्रीनुं अहो ! केवुं सुंदर रूप ! अहो ! केवी सुंदर कांति ! अहो केवो सुंदर आंखोनो वि-लास ! तथा अहो ! मारापर तेणीनो केटलो बधो प्रेम छे ! ॥ ९. ॥

**कुलस्यालंकृतिः कस्य किं नाम स्तावयत्यसौ । क मया द्रक्ष्यते केनोपायेन श्वस्तने दिने ॥ १० ॥**

अन्वयः-असौ कस्य कुलस्य अलंकृतिः ? किं नाम स्तावयति ? श्वस्तने दिने केन उपायेन क्व मया द्रक्ष्यते ? ॥ १० ॥

अर्थः—ते स्त्री कया कुलने शोभावती हशे ? (पोतानुं) शुं नाम कहेवरावती हशे ? तथा आवती काले कया उपायथी, अने क्यां ते मने देखाशे ? (मलशे ?) ॥ १० ॥

**पार्थिवेन वृथा मैत्री व्यर्था मे मन्त्रिपुत्रता । निरर्थकं च जन्मेदं यदि तस्या न संगमः ॥ ११ ॥**

अन्वयः—यदि तस्याः मे संगमः न, पार्थिवेन मैत्री वृथा, मंत्रि पुत्रता व्यर्था, च इदं जन्म निरर्थकं. ॥ ११ ॥

अर्थः—जो ते स्त्रीनो मने संगम न थाय तो, राजासाथेनी (मारी) मित्राइ नकामी छे, मंत्रीपुत्रपणुं (पण) नकामुं छे, अने आ जन्म (पण) नकामोज छे. ॥ ११ ॥

**इत्याद्यनल्पसंकल्पसंतापितमनाः स ना । प्रतियामं युगोन्मानादक्षिपद्दुःक्षिपां क्षपाम् ॥ १२ ॥**

अन्वयः—इत्यादि अनल्प विकल्प संतापित मनाः सः ना, प्रतियामं युग उन्मानात् दुःक्षिपां क्षपां अक्षिपत्. ॥ १२ ॥

अर्थः—इत्यादि अनेक विकल्पोवडे व्याकुल हृदयवाळा ते पुरुषे, दरेक पोहोरने युगजेवडो म्होटो गणतांथकां घणे प्रयासे रात्रिने वीताडी. ॥ १२ ॥ चतुर्भिः कलापकं ॥

**द्वितीयेऽह्नि स मध्याह्ने रहस्युपवने गतः । कात्यायन्या कयाप्यूचे चिन्ताचुम्बितचेतनः ॥ १३ ॥**

अन्वयः–द्वितीये अह्नि मध्याह्ने सः रहसि उपवने गतः, चिंता चुंबित चेतनः कया अपि कात्यायन्या ऊचे. ॥ १३ ॥

अर्थः—(पछी) बीजे दिवसे मध्याह्नसमये ते एकांते बगीचामां गयो, तथा चिंतातुर हृदयथी (त्यां बेठो, एवामां) कोइक कु-

टणीए (आवीने) तेने कह्युं के, ॥ १३ ॥

इहास्ति पुरवास्तव्यः स्तोतव्यगुणभूषणः । तारापीडधराधीशोपाध्यायस्तारकाभिधः ॥ १४ ॥

अन्वयः—इह पुरवास्तव्यः स्तोतव्य गुण भूषणः, तारकाभिधः तारापीड धरा अधीश उपाध्यायः अस्ति. ॥ १४ ॥

अर्थः—आ नगरनो रहेवासी, तथा प्रशंसापात्र गुणोना अलंकारवाळो, तारकनामनो तारापीडराजानो उपाध्याय छे. ॥ १४ ॥

पूर्वपत्न्यां प्रमीतायां कुलश्रीशीलशालिना । एतेनोद्वाहिता रूपमहिता रोहिताह्वया ॥ १५ ॥

अन्वयः—पूर्वपत्न्यां प्रमीतायां कुल श्री शील शालिना एतेन रूप महिता रोहिताह्वया उद्वाहिता. ॥ १५ ॥

अर्थः—प्रथमनी पत्नी गुजरीजवाथी, कुल, लक्ष्मी तथा शीलथी शोभता एवा ते उपाध्याये मनोहर रूपवाळी रोहितानामनी स्त्रीने परणेली छे. ॥ १५ ॥

जराजर्जरगात्रोऽहमियं तु नवयौवना । चलान्यक्षाणि चेत्येष दत्ते नास्या बहिर्गतिम् ॥ १६ ॥

अन्वयः—अहं जरा जर्जर गात्रः, इयं तु नव यौवना, च चलानि अक्षाणि, इति एष अस्याः बहिः गतिं न दत्ते. ॥ १६ ॥

अर्थः—हुं तो वृद्धपणाथी शिथिल शरीरवाळो छुं, अने आ रोहिता तो खीलतां यौवनवाळी छे, वळी इंद्रियो चपल होय छे, एम विचारी ते उपाध्याय तेणीने (घरनी) बहार जवा देतो नथी. ॥ १६ ॥

गतः शाखापुरे राज्ञादिष्टोऽसौ ह्यस्तने दिने । मया धात्र्या समं चेयमुद्यानं कथमप्यगात् ॥ १७ ॥

अन्वयः-राज्ञा आदिष्टः असौ ह्यस्तने दिने शाखापुरे गतः, च इयं मया धात्र्या समं कथं अपि उद्यानं अगात्. ॥ १७ ॥

अर्थः—राजाए हुकम करवाथी ते उपाध्याय गइकाले (बहार) परांमां गयो हतो, अने (तेथी) ते रोहिता (तेणीनी) धाव एवी जे हुं, तेनी साथे मुश्केलीथी बगीचामां गइ हती. ॥ १७ ॥

सुभग त्वं तया तत्र दृष्टो दृष्टिप्रियस्तथा । स्मरज्वरभरार्ता सा रोहिता मोहिता यथा ॥ १८ ॥

अन्वयः-(हे) सुभग ! तत्र दृष्टिप्रियः त्वं तया तथा दृष्टः, यथा स्मर ज्वर भर आर्ता सा रोहिता मोहिता. ॥ १८ ॥

अर्थः-हे सुभग ! त्यां नेत्रप्रिय एवा तने तेणीए एरीते जोयो, के जेथी कामतापना समूहथी पीडायेली ते रोहिता मोह पामी.

तदर्तिं हर्तुमद्यास्मद्दुहितुर्देहि दर्शनम् । विधेहि वाचिकं चेदं हारयष्ट्या सहागतम् ॥ १९ ॥

अन्वयः-अस्मद् दुहितुः तदर्तिं हर्तुं अद्य दर्शनं देहि ? च हारयष्टया सह आगतं इदं वाचिकं विधेहि ? ॥ १९ ॥

अर्थः—मारी पुत्रीनी ते कामपीडा हरवाने आजे तमो दर्शन आपो ? अने (आ) हारलतासाथे आवेलो ( तेणीनो ) नीचे मुजबनो संदेशो स्वीकारो ? ॥ ९२ ॥

स्फुरत्कान्तरुचिं कान्तां कृतस्वातिरसप्रियाम् । धेहि मां हारयष्टिं च हृदये हृदयेश्वर ॥ २० ॥

अन्वयः-(हे, हृदय ईश्वर! स्फुरत् कांत रुचिं, कांतां, कृत स्व अति रस प्रियां मां च हारयष्टिं हृदये धेहि? ॥ २० ॥

अर्थः—हे! हृदयना स्वामी! विस्तीर्ण तेजस्वी कांतिवाळी, मनोहर, तथा करेल छे (आपने) पोताना अतिरसथी प्रिय जेणीए, एवी मने तथा (आ) हारलताने (आप आपना) हृदयमां धारण करो? ॥ २० ॥

ततो हारलतां कण्ठे न्यस्य सा मे प्रियेत्यहो। विशेषादेष शिश्लेष कामिनः क्व विवेकिता ॥ २१ ॥

अन्वयः-ततः अहो! सा मे प्रिया! इति हारलतां कंठे न्यस्य एषः विशेषात् शिश्लेष, कामिनः विवेकिता क्व? ॥ २१ ॥

अर्थः—पछी अहो! ते मने प्यारी छे! एम (कही) ते हारलताने (पोताना) कंठमां नाखीने ते श्रीषेण (तेने) खूब आलिंगन करवा लाग्यो, (केमके) कामातुरने विवेकपणुं क्यांथी आवे? ॥ २१ ॥

क्षणं श्रान्तिः क्षणं भ्रान्तिः क्षणं चिन्ता क्षणं धृतिः। क्षणं त्रासः क्षणं हासस्तमव्रीडं व्यडम्बयत् २२

अन्वयः—तं अव्रीडं क्षणं श्रांतिः, क्षणं भ्रांतिः, क्षणं चिंता, क्षणं धृतिः, क्षणं त्रासः, क्षणं हासः व्यडंबयत्. ॥ २२ ॥

अर्थः—(पछी) ते निर्लज्ज श्रीषेणने क्षणमां थाक, क्षणमां भ्रम, क्षणमां चिंता, क्षणमां धैर्य, क्षणमां भय, अने क्षणमां हास्य विडंबना करवा लाग्यां. ॥ २२ ॥

इत्यस्मिन्स्मरदोषेण श्रीषेणे विषमीकृते। दुष्टचेष्टाघटापोषः प्रदोषः समभूत्ततः ॥ २३ ॥

अन्वयः—ततः इति स्मर दोषेण अस्मिन् श्रीषेणे विषमीकृते दुष्ट चेष्टा घटा पोषः प्रदोषः समभूत्. ॥ २३ ॥

अर्थः—पछी ए रीते कामविकारथी ते श्रीषेण व्याकुळ होते छते दुष्टोनी चेष्टाओने वधारनारो प्रदोष (संध्याकाळ) थयो. २३

एहि तद्भवनं तस्या यौवनं कुरु पावनम् । एवमुक्तस्तया नार्या सोऽनार्याशो मुदाचलत् ॥ २४ ॥

अन्वयः—तद्भवनं एहि! तस्याः यौवनं पावनं कुरु? एवं तया नार्या उक्तः अनार्य आशः सः मुदा अचलत् . ॥२४॥

अर्थः—(हवे) तेणीने घेर चाल? अने तेनुं यौवन पवित्र कर! एरीते ते स्त्रीए कहेवाथी दुष्ट आशावाळो, ते श्रीषेण हर्षथी चालवा लाग्यो. ॥२४॥

असन्मार्गोज्ज्वलत्कामस्तमश्छन्नोऽपरिच्छदः । स तया दुर्धिया सार्धं तां प्रापात्मेव दुर्गतिम् ॥२५॥

अन्वयः—असत् मार्गउज्ज्वलत्कामः, तमः छन्नः, अपरिच्छदः सः आत्मा दुर्गतिं इव, तया दुर्धिया सार्धं तां माप. ॥२५॥

अर्थः—खोटे रस्ते चालनारो, (हृदयमां) सळगी उठेला कामविकारवाळो, अंधकारथी (पक्षे—अज्ञानथी) छवायेलो, अने परिवारविनानो, एवो ते श्रीषेण, आत्मा जेम दुर्गतिमां जाय, तेम ते दुष्टबुद्धिवाळी स्त्रीनी साथे ते रोहिताने जइ मळ्यो. ॥२५॥

दुर्दैवद्रोहितां यावद्रोहितां वार्तयत्यसौ । तावद्धावत्परीवारस्तारको द्वारमागमत् ॥२६॥

अन्वयः—दुर्दैव द्रोहितां रोहितां यावत् असौ वार्तयति, तावत् धावत्परीवारः तारकः द्वारं आगमत् . ॥२६॥

अर्थः–दुर्दैवना द्वेषवाळी एवी ते रोहितासाथे जेवामां ते वातचीत करे छे, तेवामां दोडता परीवारवाळो ते तारक उपाध्याय बारणे आवी पहोंच्यो. ॥२६॥

कात्यायन्या स भीत्यार्तः प्रक्षिप्तः क्षालकूपके । अस्थात्प्रस्थानके गन्तुमिवायं निरयं हहा ॥ २७ ॥

अन्वयः—भीत्या आर्तः सः कात्यायन्या क्षाल कूपके प्रक्षिप्तः, हहा ! निरयं गंतु प्रस्थानके इव अयं अस्थात्. ॥ २७ ॥

अर्थः-भयथी पीडित थयेला एवा ते श्रीषेणने ( ते ) कुटणीए गटरना कुआमां फेंक्यो, (अने) अरेरे! नरकमां जवानुं जाणे प्रयाण करतो होय नही ! तेम ते तेमां रह्यो. ॥ २७ ॥

दुर्गन्धबहुले कीटसंकुले पङ्किले जले । गलदध्ने घनं मग्नः स तटीघर्षणव्रणः ॥ २८ ॥

अन्वयः—तटी घर्षण व्रणः सः दुर्गंध बहूले, कीट संकुले, गलदध्ने पंकिले जले घनं मग्नः ॥ २८ ॥

अर्थः-( ते कूपना ) किनारापर घसावाथी ( शरीरमां ) घारां पडेलो ते श्रीषेण, अत्यंत दुर्गंधी, कीडाओथी भरेला, अने कादववाळां पाणीमां छेक कंठसुधी बुडी गयो. ॥ २८ ॥

तत्र शूकाकृतोत्कारवान्ताहाररयाहतैः । उत्थितैः कुथितैः क्षालजलैर्विशद्भिराननें ॥ २९ ॥

लोलाभिर्वान्तलालाभिः पिच्छलाभिर्वृतोऽभितः । सशृङ्गारोऽपि बीभत्सरसोऽङ्गीव बभूव सः ॥ ३० ॥

अन्वयः—तत्र शूका कृत उत्कार वांत आहार रय आहतैः, उत्थितैः कुथितैः क्षालजलैः आनने विशद्भिः, ॥२९॥ लोलाभिः पिच्छलाभिः वांत लालाभिः अभितः वृतः सः सशृंगारः अपि अंगी बीभत्स रसः इव बभूव. ॥ ३० ॥ युग्मं ॥

अर्थः-त्यां सूगथी करेली ओकारीवडे वमेला आहारना वेगना झपाटाथी उछळेलुं ते कोहेलुं खाळनुं पाणी मुखमां जवाथी २९

तथा मुखमांथी लटकती, अने चीकणी उल्टीनी लाळोवडे चोतरफथी छवाइ गयेलो ते श्रीषेण (आभूषणो विगेरेथी) शणगारेलो होवा छतां पण जाणे देहधारी बीभत्सरस होय नही ! तेवो थइ गयो ॥ ३० ॥ युग्मं ॥

**वदने मशकैर्दंशैः कृमिभिस्तिमिभिस्तनौ । तलेऽसौ कर्परैः कीलैस्तदात्यर्थं कदर्थितः ॥ ३१ ॥**

अन्वयः-तदा असौ वदने मशकैः दंशैः, तनौ कृमिभिः तिमिभिः, तले कर्परैः (कर्करैः) कीलैः अत्यर्थं कदर्थितः ॥३१॥

अर्थः—ते वखते ते श्रीषेण मुखपर मच्छरो अने डांसोवडे, शरीरपर कीडा तथा जलचरो वडे, अने पगने तलीये काचलां (कांकरा) तथा खीलाओवडे अत्यंत कष्ट पामवा लाग्यो. ॥ ३१ ॥

**विशत्यम्बुनि नासायामनाशोऽयं स्वजीविते । कूपकण्ठे क्षिपन्हस्तौ तीक्ष्णालेनालिना हतः ॥ ३२ ॥**

अन्वयः—नासायां अंबुनि विशति स्वजीविते अनाशः अयं कूप कंठे हस्तौ क्षिपन् तीक्ष्ण अलेन अलिना हतः. ॥ ३२ ॥

अर्थः-नाकमां ते पाणी जवाथी जीववानी आशा तजीने ते श्रीषेण ते कुआना कांठापर हाथ राखवा लाग्यो, त्यारे तीक्ष्ण दंशवाळा विछुए तेने डंख मार्यो. ॥ ३२ ॥

**इत्थं निशीथकालेऽसौ नरको नरकाधिकम् । सहमानो महादुःखमश्रौषीत्तुमुलं गृहे ॥ ३३ ॥**

अन्वय;—इत्थं नरक अधिक महा दुःखं सहमानः असौ नरकः निशीथ काले गृहे तुमुलं अश्रौषीत्. ॥ ३३ ॥

अर्थ-एरीते नरकथी पण अधिक अति कष्टने सहन करता एवा ते श्रीषेणे मध्यरात्रिए (ते) घरनी अंदर कोलाहल सांभळयो.

**तदार्धवृद्धा दक्षासौ क्षालतः सज्जरज्जुना । तमाचकर्ष दुःकर्मत्रुटिर्जीवमिवाशिवात् ॥ ३४ ॥**

अन्वयः-तदा अर्धवृद्धा असौ दक्षा दुःकर्मत्रुटिः अशिवात् जीवं इव, सज्ज रज्जुना तं क्षालतः आचकर्ष. ॥ ३४ ॥

अर्थः—ते वखते अर्धजरती एवी ते चतुर कुट्टणीए, दुष्कर्मोनो विनाश उपद्रवमांथी जीवनो जेम (उद्धार करे) तेम तैयार राखेलां दोरडांवडे ते श्रीषेणने (ते) खालमांथी (बहार) खेंची कहाड्यो. ॥ ३४ ॥

**आगत्योपवने तत्र ज्ञापयिष्यामि भाविनम् । वृत्तान्तं तु नितान्तं त्वां व्रज द्वारेऽस्ति कोऽपि न ॥३५॥**

अन्वयः-तत्र उपवने आगत्य भाविनं नितांतं वृत्तांतं तु त्वां ज्ञापयिष्यामि, व्रज ? द्वारे कः अपि न अस्ति. ॥ ३५ ॥

अर्थः-ते बगीचामां आवीने हवे थनारुं सघळुं वृत्तांत (हुं) तने जणावीश, (माटे हमणा) चाल्यो जा ? दरवाजे कोइ पण नथी.

**एवमुक्तस्तया क्षालजलाविलतनुस्ततः । प्रणनाश स कीनाशपाशच्युत इव द्रुतम् ॥ ३६ ॥**

अन्वयः-तया एवं उक्तः, क्षाल जल आविल तनुः सः कीनाश पाश च्युतः इव ततः द्रुतं प्रणनाश. ॥ ३६ ॥

अर्थः—तेणीए एम कह्याथी. खालना जलथी लींपायेलां शरीरवाळो ते श्रीषेण जाणे यमना पाशमांथी छूटयो होय नही ! तेम त्यांथी एकदम नाशी छूटयो. ॥ ३६ ॥

**नरैरारक्षकैः कोलाहलं श्रुत्वा त्वरागतैः । नश्यन्दृष्टः स कोदण्डदण्डैर्हत्वा न्यबध्यत ॥ ३७ ॥**

अन्वयः-कोलाहलं श्रुत्वा त्वरा आगतैः आरक्षकैः नरैः सः नश्यन् दृष्टः, कोदंड दंडैः हत्वा न्यबध्यत. ॥ ३७ ॥

श्रीषेण चरित्रं ॥ १२ ॥

सान्वय भाषान्तर ॥ १२ ॥

अर्थः—कोलाहल सांभळीने एकदम आवेला पोलीसना माणसोए ते श्रीषेणने ( त्यांथी ) नाशतो दीठो, ( तेथी तेओए तेने ) धनुषना दंडोथी मारीने बांध्यो. ॥ ३७ ॥

गर्ताशूकरवत्कोऽयं दिग्धो दुर्गन्धकर्दमैः । इति दीपकरैरेभिरीक्षितः सोपलक्षितः ॥ ३८ ॥

अन्वयः—दुर्गंध कर्दमैः दिग्धः गर्ताशूकरवत् अयं कः ? इति दीपकरैः एभिः ईक्षितः, च सोपलक्षितः. ॥ ३८ ॥

अर्थः—दुर्गंधवाळा कादवथी खरडायेलो खाबोचीयामां आलोटता डुक्करजेवो आ कोण छे ? एम विचारी हाथमां दीपक लेइ तेओए जोवाथी तेने ओळखी कहाड्यो के, ॥ ३८ ॥

युक्तो मोक्तुममोक्तुं वा मित्रं क्षितिपतेरसौ । इत्यालोचपराः सर्वे नरा मूढत्वमागमन् ॥ ३९ ॥

अन्वयः—असौ क्षितिपतेः मित्रं मोक्तु वा अमोक्तुं युक्तः ? इति आलोच पराः सर्वे नराः मूढत्वं आगमन्. ॥ ३९ ॥

अर्थः—आ तो राजानो मित्र श्रीषेण छे, ( माटे तेने ) छोडी मूकवो के न छोडवो ठीक, एम विचारमां पडेला ते पोलीसना सर्वे मनुष्यो मुंझवणमां पड्या. ॥ ३९ ॥

तदावदातधीर्वीरचर्यया संचरन्नृपः । आययौ तुमुलाकृष्टो दृष्टवान्पथि तं तथा ॥ ४० ॥

अन्वयः—तदा अवदातधीः नृपः वीर चर्यया संचरन् तुमुल आकृष्टः आययौ, तथा पथि तं दृष्टवान्. ॥ ४० ॥

अर्थः—ते समये निर्मल बुद्धिवाळो राजा गुप्तवेषे फरतोथको आ कोलाहलथी खेंचाइने त्यां आव्यो, तथा मार्गमां ( तेणे ) ते

श्रीषेणने दीठो. ॥ ४० ॥

ज्ञात्वा तं कृतिनां सीमा श्रीमान्भूमानचिन्तयत् । मन्येऽसौ मदुपाध्यायालये तुमुलकारणम् ॥ ४१ ॥

अन्वयः-तं ज्ञात्वा कृतिनां सीमा श्रीमान् भूमान् अचिंतयत्, मदुपाध्याय आलये तुमुल कारणं असौ, मन्ये. ॥ ४१ ॥

अर्थः—तेने ओळखीने चतुरशिरोमणि एवो ते श्रीमान् राजा विचारवा लाग्यो के, मारा उपाध्यायना घरमां कोलाहलनुं कारण आ श्रीषेण छे, एम हुं मानुं छुं. ॥ ४१ ॥

संसारे स्खलितं कस्य न स्यान्मतिमतोऽपि वा । किं तु मे मित्रमाबाल्यात्तन्न युक्तमुपेक्षितुम् ॥४२॥

अन्वयः-वा संसारे कस्य मतिमतः अपि स्खलितं न स्यात्? किंतु मे आबाल्यात् मित्रं, तत् उपेक्षितुं युक्तं न. ॥ ४२॥

अर्थः—अथवा ( आ ) संसारमां कया बुद्धिमाननी पण भूल नथी थती? परंतु ( आ श्रीषेण ) मारो बालपणाथी मित्र छे, माटे ( आ समये ) तेमाटे मारे बेदरकार रहेवुं ठीक नही. ॥ ४२ ॥

दृष्ट्वा मां त्वस्य लज्जा स्याद्बाधाकृद्बन्धनादपि । इति निश्चत्य कृत्यार्थं प्रकृत्या निभृतोपकृत् ॥ ४३ ॥

अन्वयः-मां दृष्ट्वा तु बाधाकृत् बंधनात् अपि अस्य लज्जा स्यात्, इति कृत्यार्थं निश्चित्य, प्रकृत्या निभृत उपकृत्. ॥४३॥

अर्थः-मने जोइने तो (आ) दुःखदाइ बंधनथी पण तेने लज्जा थशे, एम योग्यतापूर्वक कार्य करवानो निश्चय करीने स्वभावथीज अति उपकार करनारा. ॥ ४३ ॥

आरक्षकाणामात्मानं ज्ञापयित्वैष सत्वरम् । श्रीषेणं मोचयांचक्रे तारापीडः स्वपीडया ॥ ४४ ॥

अन्वयः—एषः तारापीडः स्व पीडया आरक्षकाणां आत्मानं ज्ञापयित्वा सत्वरं श्रीषेणं मोचयां चक्रे ॥ ४४ ॥

अर्थः—ते तारापीड राजाए पोताने थतां दुःखथी पोलीसना माणसोने पोतानी खबर आपीने तुरत श्रीषेणने छोडाव्यो ॥४४॥

वपुःप्रमाणात्प्रच्छन्नोपकृतिप्रकृतित्वतः । स्वस्य द्राग्बन्धमोक्षाच्च नृपस्तेनोपलक्षितः ॥ ४५ ॥

अन्वयः—वपुः प्रमाणात्, प्रच्छन्न उपकृति प्रकृतित्वतः, च स्वस्य द्राग् बंधमोक्षात् तेन नृपः उपलक्षितः ॥ ४५ ॥

अर्थः—शरीरना प्रमाणथी, गुप्तरीते उपकार करवाना स्वभावथी, अने पोते तुरत बंधनमांथी छूटवाथी ते श्रीषेणे राजाने ओळखी कहाड्यो. ॥ ४५ ॥

ततो दर्शयितुं स्वास्यमशक्तः सैष लज्जया । राज्ञादिष्टैर्भटैर्दूरादावृतः स्वगृहेऽगमत् ॥ ४६ ॥

अन्वयः—ततः लज्जया स्व आस्यं दर्शयितुं अशक्तः सः एषः राज्ञा आदिष्टैः भटैः दूरात् आवृतः स्वगृहे अगमत्. ॥ ४६ ॥

अर्थः—पछी लज्जाथी पोतानुं मुख देखाडवाने अशक्त एवो ते श्रीषेण राजाए हुकम करेला ते सुभटोवडे दूरथी वींटायो थको पोताने घेर गयो. ॥ ४६ ॥

धौताङ्गः स प्रगे तत्रोपवनेऽस्थाल्लतागृहे । आरामपालकेभ्यश्च वाचं शुश्राव दुःश्रवाम् ॥ ४७ ॥

अन्वयः—धौतांगः सः प्रगे तत्र उपवने लतागृहे अस्थात्, च आराम पालकेभ्यः दुःश्रवां वाचं शुश्राव. ॥ ४७ ॥

अर्थः-शरीर साफ करीने ते श्रीषेण प्रभाते ते बगीचामां वेलडीओना मंडपमां जइने बेठो, तथा ते बगीचाना रक्षको पासेथी ( नीचे जणाव्या मुजब ) न संभळाय एवी वाणी सांभळवा लाग्यो. ॥ ४७ ॥

अद्य रोहितया रात्रौ पत्युर्निद्राजुषः श्रमात् । गलं छेत्तुं समुत्क्षिप्तः क्षुरिकादुर्धरः करः ॥ ४८ ॥

अन्वयः-अद्य रात्रौ रोहितया श्रमात् निद्राजुषः पत्युः गलं छेत्तुं क्षुरिका दुर्धरः करः समुत्क्षिप्तः ॥ ४८ ॥

अर्थः—आजे रात्रिए रोहिताए थाकीने निद्रावश थयेला एवा पोताना स्वामीनुं गलुं कापवामाटे पकडेली छरीवाळो (पोतानो) हाथ उगाम्यो. ॥ ४८ ॥

तदाभूत्क्षुरिकास्तम्भस्तारकः सहसोत्थितः। रोहिता हृद्धरे (रैः) बद्धा बन्धनै रज्जुवर्जितैः ॥ ४९ ॥

अन्वयः-तदा क्षुरिका स्तंभः अभूत्, तारकः सहसा उत्थितः, रोहिता रज्जुवर्जितैः हृद्धरैः बंधनैः बद्धा. ॥ ४९ ॥

अर्थः—ते वखते ते छरी थंभाइ गइ, अने तारक ( पण ) एकदम जागी उठ्यो, अने रोहिता पण दोरडांविनाना छाती भराइ जाय एवां बंधनोवडे बंधाइ गइ. ॥ ४९ ॥

अदृष्टैः सा हता घातैरारराट तथा कटु । यथास्य पत्तयोऽन्ये च दधावुस्तुमुलाकुलाः ॥ ५० ॥

अन्वयः-अदृष्टैः घातैः हता सा तथा कटु आरराट, यथा अस्य पत्तयः च अन्ये तुमुल आकुलाः दधावुः. ॥ ५० ॥

अर्थः—वळी अदृश्य मार पडवाथी ते एटली तो बूमो पाडवा लागी के, जेथी तेना नोकरो तथा बीजा माणसो पण बूमो पाडता (त्यां) दोडी आव्या. ॥ ५० ॥

**कुतोऽप्यागाद्धराधीशः स्वोपाध्यायममत्वतः । स क्षणाद्धूपमुत्क्षिप्य नम्रस्तामित्यभाषत ॥ ५१ ॥**

अन्वयः—कुतः अपि धराधीशः आगात्, स्व उपाध्याय ममत्वतः सः नम्रः क्षणात् धूपं उत्क्षिप्य तां इति अभाषत. ॥ ५१ ॥

अर्थः—(एवामां) क्यांकथी राजा (पण त्यां ) आवी पहोंच्यो, तथा पोताना उपाध्यायनी ममताथी ते नम्र थइ, धूप करीने तेणीने आरीते कहेवा लाग्यो के, ॥ ५१ ॥

**महाप्रभावे कासि त्वं तत्त्वं देवि ममादिश । स्त्रीमात्रेऽत्र कृपापात्रे किममर्षः प्रकर्षितः ॥ ५२ ॥**

अन्वयः—हे महाप्रभावे ! त्वं का असि? (हे) देवि ! मम आदिश? अत्र कृपा पात्रे स्त्रीमात्रे अमर्षः किं प्रकर्षितः? ॥ ५२ ॥

अर्थः—हे महान् प्रभाववाळी तुं कोण छे? तथा (हे) देवि ! मने (आ) हकीकत जणावो? आ दया करवालायक रांकडी स्त्रीपर तमोए केम कोप कर्यो छे? ५२ ॥

**एताभिर्भक्तिभाषाभिस्त्यक्त्वा स्तोकतरां रुषम् । नभःप्रभवया वाण्या बभाषे देवता नृपम् ॥५३॥**

अन्वयः—एताभिः भक्तिभाषाभिः स्तोकतरां रुषं त्यक्त्वा देवता नभः प्रभवया वाण्या नृपं बभाषे ॥ ५३ ॥

अर्थः—ए रीतना भक्तिवाळां वचनोथी जरा रोषने तजीने ते देवी आकाशवाणीवडे राजाने कहेवा लागी के, ॥ ५३ ॥

सम्यग्दृष्टिरहं देवी भक्ता सर्वज्ञशासने । धर्मकर्मप्रवृत्तानां सतां विघ्नान्निवारये ॥ ५४ ॥

तत्त्वज्ञं दृढसम्यक्त्वं परदारपराङ्मुखम् । स्वपतिं निघ्नती क्रूरा मया बद्धेयमस्ति तत् ॥ ५५ ॥युग्मम्॥

अन्वयः—अहं सर्वज्ञ शासने भक्ता सम्यग्दृष्टिः देवी, धर्म कर्म प्रवृत्तानां सतां विघ्नान् निवारये, ॥ ५४ ॥ तत् तत्त्वज्ञं, दृढ सम्यक्त्वं, परदार पराङ्मुखं स्वपतिं निघ्नती इयं क्रूरा मया बद्धा अस्ति. ॥ ५५ ॥ युग्मं ॥

अर्थः—हुं श्रीजैनशासनमां भक्तिवाळी सम्यग्दृष्टी देवी छुं, अने धर्मकार्यो करनारा सज्जनोनां विघ्नो नु निवारण करुं छुं, ॥५४॥ अने तेथी तत्वना जाणकार, दृढ समकीती, तथा परस्त्रीनो त्याग करनारा, एवा पोताना पतिने मारती, एवी आ क्रूर स्त्रीने में बांधेली छे. ॥ ५५ ॥ युग्मं ॥

किमसौ स्वपतिं हन्तीत्युक्ता राज्ञाह देवता । तमेव रमणं कर्तुं यो बद्धो मोचितस्त्वया ॥ ५६ ॥

अन्वयः—असौ स्वपतिं किं हंति ? इति राज्ञा उक्ता देवता आह, बद्धः यः त्वया मोचितः तं एव रमणं कर्तुं. ॥ ५६ ॥

अर्थः—आ स्त्री पोताना स्वामीने शामाटे मारे छे? एम राजाए कहेवाथी ते देवी बोली के, बांधेला जे पुरुषने तें छोडाव्यो, तेनीज साथे विलास करवा माटे. ॥ ५६ ॥

सर्वज्ञाज्ञास्ति तेऽमुष्य भाषसे यदि दूषणम् । प्रकाशयसि नामापि राज्ञा देवीति वारिता ॥ ५७ ॥

अन्वयः—अमुष्य यदि दूषणं भाषसे, नाम अपि प्रकाशयसि, ते सर्वज्ञ आज्ञा अस्ति, इति राज्ञा देवी वारिता. ॥ ५७ ॥

अर्थः—ते पुरुषनुं जो तुं दूषण बोलीश, अने नाम पण प्रकट करीश, तो तने सर्वज्ञ प्रभुनी आणा छे, एम कही राजाए ते देवीने तेम करतां अटकावी. ॥ ५७ ॥

**किं तूक्ता तारकेणासौ सकृपेण नृपेण च । देव्युद्बध्नाति नाद्यापि रोहितां रमणाहिताम् ॥ ५८ ॥**

अन्वयः—सकृपेण तारकेण च नृपेण उक्ता, किंतु असौ देवी रमण अहितां रोहितां अद्य अपि न उद्बध्नाति. ॥ ५८ ॥

अर्थः—( पछी ) ते दयाळु तारके अने राजाए कहेवा छतां पण ते देवीए ( पोताना) भर्तारनुं अहित करनारी ते रोहिताने हजु पण बंधनरहित करी नथी. ॥ ५८ ॥

**एवमाकर्ण्य कर्णेषु तप्तत्रपुसमं वचः । श्रीषेणश्चिन्तयांचक्रे बलाद्वैराग्यसंगमः ॥ ५९ ॥**

अन्वयः—एवं कर्णेषु तप्त त्रपु समं वचः आकर्ण्य बलात् वैराग्य संगमः श्रीषेणः चिंतयांचक्रे. ॥ ५९ ॥

अर्थः—एरीते श्रवणोमां तपेला सीसासरखुं वचन सांभळीने पराणे वैराग्य पामेलो ते श्रीषेण विचारवा लाग्यो के, ॥ ५९ ॥

**मन्येऽस्मिन्नेव संजाते तुमुले मलसंकुलः । क्षालतः क्षणतः क्षिप्तस्तया बहिरहं तदा ॥ ६० ॥**

अन्वयः—अस्मिन् एव तुमुले संजाते तदा तया मलसंकुलः अहं क्षणतः क्षालतः बहिः क्षिप्तः मन्ये ॥ ६० ॥

अर्थः—आ कोलाहल थवाथीज ते वखते ते कुटणीए मेलथी खरडाएला एवा मने तुरतज खाळमांथी कहाडीने बहार मेल्यो, एम हुं मानुं छुं. ॥ ६० ॥

दुराचारद्रुमारामवनीरेता नितम्बिनीः । दुर्मेधाः किं व्यधाद्वेधाश्चिन्ता वासौ वृथा मम ॥ ६१ ॥

अन्वयः-दुर्मेधाः वेधाः दुराचार द्रुम आराम वनीः एताः नितंबिनीः किं व्यधात् ? वा मम असौ चिंता वृथा. ॥ ६१ ॥

अर्थः—दुर्बुद्धि विधाताए दुराचारोरूपी वृक्षोना बगीचानी वनभुमिसरखी आ स्त्रीओने शामाटे बनावी होशे ? अथवा मारे आवी चिंता करवी नकामी छे. ॥ ६१ ॥

नार्यः कुकार्यकर्तृत्वान्निन्द्याश्चेत्तत्पुमानपि । महानिन्द्योऽस्मि दुःकर्ममूलदुःशीलभाग् यतः ॥ ६२ ॥

अन्वयः-कुकार्यकर्तृत्वात् नार्यः चेत् निंद्याः, तत् पुमान् अपि महानिंद्यः अस्मि, यतः दुःकर्म मूल दुःशीलभाग्. ॥ ६२ ॥

अर्थः-दुष्कार्य करवाथी स्त्रीओ जो निंदाने पात्र छे, तो हुं पुरुष पण अतिनिंदाने पात्र छुं, केमके हुं आ दुष्कार्यना मूलरूप दूराचारवाळो छुं. ॥ ६२ ॥

मम धिग्मानुषं जन्म कुलं येन कलङ्कितम् । सावद्या सापि विद्याभूत्पापे मय्यपि या स्थिता ॥ ६३ ॥

अन्वयः-मम मानुषं जन्म धिक्, येन कुलं कलंकितं, या मयि पापे स्थिता, सा विद्या अपि सावद्या अभूत्. ॥ ६३॥

अर्थः-मारा मनुष्यजन्मने धिक्कार छे, के जेणे कुलने कलंकित कर्युं, वळी पापी एवो जे हुं, तेमां रहेली ते विद्या पण पापना दूषणवाळी थइ. ॥ ६३ ॥

क्षितौ जितेन्द्रियत्वं हि मूलं गुणलताततेः । कुशीलत्वकुशीघातैर्मयोत्क्षिप्तं तदद्य हा ॥ ६४ ॥

अन्वयः-क्षितौ हि जितेंद्रियत्वं गुण लता ततेः मूलं, तत् अद्य हा मया कुशीलत्व कुशी घातैः उत्क्षिप्तं. ॥ ६४ ॥

अर्थः--आ पृथ्वीपर खरेखर जितेंद्रियपणुं गुणोरूपी वल्लीओनी श्रेणिना मूळसरखुं छे, ते मूळने आजे अरेरे ! में दुराचाररूपी कोशना प्रहारोवडे उखेडी नाख्युं ! ॥ ६४ ॥

मामकृत्यमतिं मत्वा त्रस्ता सापि त्रपा तदा । तिष्ठेदविरलं किं वा वारला पङ्किले जले ॥ ६५ ॥

अन्वयः—तदा मां अकृत्य मतिं मत्वा सा त्रपा अपि त्रस्ता, वा वारला पंकिले जले किं अविरलं तिष्ठेत्? ॥ ६५ ॥

अर्थः—ते समये मने अकार्यनी बुद्धिवाळो जाणीने ( मारी ) ते लज्जा पण नाशी गइ, अथवा हंसी कादवयुक्त जलमां शुं निरंतर रहे छे? ॥ ६५ ॥

स्तुत्यः स सत्यमित्रत्वपात्रं क्षत्रशिरोमणिः । तारापीडोऽखिलां पीडां जह्रे यो ह्रीकरीं मम ॥ ६६ ॥

अन्वयः—सत्य मित्रत्व पात्रं, क्षत्र शिरोमणिः सः तारापीडः स्तुत्यः, यः मम ह्रीकरीं अखिलां पीडां जह्रे. ॥ ६६ ॥

अर्थः-खरी मित्राइना पात्रसरखो, तथा क्षत्रीओमां मुकुटसमान ते तारापीड राजा प्रशंसाने पात्र छे, के जेणे मारी लजावनारी सर्व पीडा दूर करी. ॥ ६६ ॥

अश्रोतव्यचरित्रोऽहमपावित्र्यधनोऽधुना । स्वमुखं दर्शयिष्यामि कथं तस्योपकारिणः ॥ ६७ ॥

अन्वयः—अश्रोतव्य चरित्रः, अपावित्र्य धनः अहं अधुना तस्य उपकारिणः स्वमुखं कथं दर्शयिष्यामि ? ॥ ६७ ॥

अर्थः—न सांभळवा लायक आचरणवालो, तथा मलीनतारूपी धनवाळो, एवो हुं हवे ते उपकारी मित्रने मारुं मुख शी रीते बतावी शकीश ? ॥ ६७ ॥

धन्यास्ते ये स्मिताम्लानमानमाल्यधरा नराः । स्वकीर्तिमुक्ताभरणैर्विभुष्य भुवनान्यगुः ॥ ६८ ॥

अन्वयः-ये नराः स्मित अम्लान मान माल्य धराः स्व कीर्ति मुक्ता आभरणैः भुवनानि विभुष्य अगुः, ते धन्याः. ॥ ६८ ॥

अर्थः—जे पुरुषो विकस्वर थयेली तथा नही करमायेली एवी सन्मानरूपी पुष्पमालाने धारण करीने, तथा पोतानी कीर्ति-रूपी मोतीना आभूषणोवडे त्रणे भुवनोने शणगारीने चाल्या गया छे, तेओने धन्य छे. ॥ ६८ ॥

इत्थं चिन्तयतोऽत्यर्थं तस्य संविग्नचेतसः । तारकौकःप्रदेशेऽभूज्जयकोलाहलोऽम्बरे ॥ ६९ ॥

अन्वयः-इत्थं अत्यर्थं चिंतयतः, संविग्न चेतसः तस्य, तारक ओकः प्रदेशे अंबरे जय कोलाहलः अभूत्. ॥ ६९ ॥

अर्थः-एम अत्यंत विचारतो, तथा वैराग्ययुक्त मनवाळो ते होते छते, ते तारक उपाध्यायना घरनी आसपास आकाशमां जय जय शब्दोनो कोलाहल थयो. ॥ ६९ ॥

**तमाकर्ण्य स ऊर्ध्वास्यो यावत्तिष्ठति विस्मितः । तावदाभाष्यतागत्य कात्यायन्या विरक्तया ॥ ७० ॥**

अन्वयः-तं आकर्ण्य विस्मितः सः यावत् ऊर्ध्वास्यः तिष्ठति, तावत् विरक्तया कात्यायन्या आगत्य आभाष्यत. ॥ ७० ॥

अर्थः—ते सांभळीने आश्चर्य पामेलो ते श्रीषेण जेवामां उंचु मुख करीने उभो छे, तेवामां विरक्त थयेली ते कुटणीए ( त्यां ) आवीने (तेने) कह्युं के, ॥ ७० ॥

**मया वत्स स्ववत्साया वात्सल्यान्मूढचेतसा । ह्यस्तनेऽहनि सद्बुद्धिधिक्कृतं दुःकृतं कृतम् ॥ ७१ ॥**

अन्वयः-( हे ) वत्स ! स्व वत्सायाः वात्सल्यात् मूढ चेतसा मया ह्यस्तने अहनि सुद्बुद्धि धिक्कृतं दुःकृतं कृतं. ॥ ७१ ॥

अर्थः-( हे ) वत्स ! मारी पुत्रीना प्रेमथी मूढ हृदयवाळी एवी जे हुं, तेणीए गइ काले सद्बुद्धिवाळा लोकोने तिरस्कार करवा लायक दुष्कार्य कर्युं छे. ॥ ७१ ॥

**तत्त्वदीयमहाकष्टैः स्वपुत्र्या दुष्टचेष्टितैः । अनुभूतमिदं दुःखं सद्योऽवद्यफलं मया ॥ ७२ ॥**

अन्वयः-तत् त्वदीय महाकष्टैः, स्वपुत्र्याः दुष्ट चेष्टितैः मया सद्यः अवद्यफलं इदं दुःखं अनुभूतं ॥ ७२ ॥

अर्थः-अने तेथी तने महाकष्टमां नाखीने, तथा मारी पुत्रीना दुराचरणोथी में पापना तुरतफळरूपी आ दुःख अनुभव्युं छे.

**त्वत्कृते यत्तया पत्युरहितं विहितं निशि । तल्लोकज्ञातमप्यत्र मम वक्तुं न युज्यते ॥ ७३ ॥**

अन्वयः—त्वत्कृते तया निशि पत्युः यत् अहितं विहितं, तत् लोक ज्ञातं अपि, अत्र मम वक्तुं न युज्यते. ॥ ७३ ॥

अर्थः—तारे माटे तेणीए रात्रीसमये ( पोताना ) स्वामीनुं जे बुरुं कर्युं छे, ते जोके लोकोमां प्रसिद्ध थयुं छे, तो पण अहीं मारे ते कहेवुं लायक नथी. ॥ ७३ ॥

**तन्निःशेषं श्रुतं मातः प्रातरुद्यानपालतः । कस्त्वयं तद्गृहोद्देशगगने मङ्गलध्वनिः ॥ ७४ ॥**

अन्वयः—(हे मातः ! तत् निःशेषं प्रातः उद्यानपालतः श्रुतं, तु तद् गृहोद्देश गगने मंगलध्वनिः कः? ॥ ७४ ॥

अर्थः—हे माताजी ! ते सघळुं प्रभातमां (में) आ उद्यानपालपासेथी सांभळ्युं छे, परंतु तेना घरनी आसपास आकाशमां (आ) मंगलीक शब्द शानो संभळाय छे? ॥ ७४ ॥

**इति श्रीषेणपृष्टेयमाचष्टे स्म सविस्मया । इदं वत्स स्वधर्मस्य स्वल्पस्यापि फलं श्रृणु ॥ ७५ ॥ युग्मम् ॥**

अन्वयः-इति श्रीषेणपृष्टा सविस्मया इयं आचष्टेस्म, ( हे ) वत्स! स्वल्पस्य अपि स्वधर्मस्य इदं फलं शृणु? ॥ ७५ ॥

अर्थः—एरीते श्रीषेणे पूछवाथी आश्चर्य पामेली ते कुटणी कहेवा लागी के, हे वत्स ! पोताना स्वल्प धर्मनुं पण आ फल (तुं) सांभळ? ॥ ७५ ॥ युग्मं ॥

**सकृपेण नृपेणापि प्रोक्ता शासनदेवता । बद्धक्रोधा विधत्ते न मत्पुत्र्या बन्धमोक्षणम् ॥ ७६ ॥**

अन्वयः—सकृपेण नृपेण प्रोक्ता अपि बद्ध क्रोधा शासन देवता मत्पुत्र्याः बंध मोक्षणं न विधत्ते. ॥ ७६ ॥

अर्थः—ते दयाळु राजाए कह्या छतां पण क्रोध न तजती एवी ते शासनदेवीए मारी ते पुत्रीने बंधनथी छूटी करी नही. ७६

पृथ्वीनाथोऽप्यथ व्यर्थाभ्यर्थनः सव्यथो हृदि । ययावस्तोकलोकेन स्वमोकः शोकसंकुलः ॥ ७७ ॥

अन्वयः-अथ व्यर्थ अभ्यर्थनः हृदि सव्यथः पृथ्वीनाथः अपि शोकसंकुलः अस्तोक लोकेन स्वं ओकः ययौ. ॥ ७७ ॥

अर्थः—पछी फोकट गयेली प्रार्थनावाळो, तथा हृदयमां खेद पामेलो ते राजा पण दिलगिर थयोथको सर्व लोको सहित पोताने घेर गयो. ॥ ७७ ॥

संप्रत्यकस्मादस्माकं सुकृतैः प्रेरितं गृहे । साध्वीयुगलमध्वेक्षादक्षं भिक्षाकृतेऽविशत् ॥ ७८ ॥

अन्वयः-संप्रति अकस्मात् अस्माकं सुकृतैः प्रेरितं, अध्व ईक्षा दक्षं साध्वी युगलं भिक्षाकृते गृहे अविशत् ॥ ७८ ॥

अर्थः-एवामां अमारां पुण्योवडे प्रेरायेलुं, तथा मार्ग जोवामां चतुर ( ईर्यासमिति पाळतुं ) एवुं साध्वीओनुं जोडुं भिक्षामाटे घरमां दाखल थयुं. ॥ ७८ ॥

दृष्ट्वा तदुच्चरोमाञ्चकञ्चुका साश्रुलोचना । बन्धनाभावतोऽकुण्ठा भूमिपीठे लुठन्त्यसौ ॥ ७९ ॥

शरणं मे त्वदीयौ स्तश्चरणाविति वादिनी । अनमच्च सुता साध्वीमभवच्चाम्बरे वचः ॥ ८० ॥ युग्मम् ॥

अन्वयः—तद् दृष्ट्वा उच्च रोमांच कंचुका, साश्रुलोचना बंधन अभावतः अकुंठा, भूमिपीठे लुठंती असौ सुता, मे त्वदीयौ

चरणौ शरणं स्तः, इति वादिनी साध्वीं अनमत्, च अंबरे वचः अभवत्. ॥ ७९ ॥ ८० ॥ युग्मं ॥

अर्थः-तेमने जोइने उभां थयेलां रोमांचरूपी कंचुकवाळी, अश्रुओ सहित आंखोवाळी, तथा बंधनरहित थवाथी अटकाव विना पृथ्वीतलपर लोटती, एवी ते (मारी) पुत्री, मने आपना चरणोनुं शरण छे, एम बोलती थकी ते साध्वीने नमी, अने (तेजसमये) आकाशमां वाणी थवा लागी के, ॥ ७९ ॥ ८० ॥ युग्मं ॥

शुद्धा श्रद्धा त्वया दध्रे साध्वीं नन्तुं मुदा यदा । तदैव दैवता बन्धाः संहृता रोहिते मया ॥ ८१ ॥

यत्त्वया सुव्रताख्येयमजिह्मब्रह्मचारिणी । साध्वी नता पवित्रासि तत्त्वं साधर्मिका मम ॥ ८२ ॥

इत्युदीर्य चिरं वर्यतूर्यध्वानेन मिश्रितम् । जयकोलाहलं कृत्वा तिरोधत्ते स्म देवता ॥८३॥त्रिभिर्विशेषं.

अन्वयः—हे रोहिते! यदा त्वया साध्वीं नंतुं मुदा शुद्धा श्रद्धा दध्रे, तदैव मया दैवताः बंधाः संहृताः. ॥ ८१ ॥यत् त्वया अजिह्म ब्रह्मचारिणी इयं सुव्रताख्या साध्वी न ता तत् पवित्रा त्वं मम साधर्मिका असि, ॥ ८२ ॥ इति उदीर्य वर्य तूर्य ध्वानेन मिश्रितं जय कोलाहलं चिरं कृत्वा देवता तिरोधत्तेस्म. ॥ ८३ ॥ त्रिभिर्विशेषकं ॥

अर्थः—(हे) रोहिते! ज्यारे तें साध्वीने नमवा माटे हर्षथी निर्मल श्रद्धाने धारण करी त्यारेज में तारां दिव्यबंधनो संहरी लीधां छे, ॥ ८१ ॥ (वळी) जे तें अखंडित ब्रह्मचर्य धरनारी आ सुव्रता नामनी साध्वीने वांदी, तेथी पवित्र थयेली तुं मारी साधर्मिक थइ छो. ॥ ८२ ॥ एम कही उत्तम वाजित्रोना नाद सहित घणा काळसुधी जयजयारव करीने ते शासनदेवी अदृश्य थइ.

अथात्मचरितोद्विग्नं व्रते तस्थौ मनो मम । वह्निना व्यथितः पाथस्यमृतः पारदो यथा ॥ ८४ ॥

अन्वयः—अथ वह्निना व्यथितः पारदः यथा पाथसि अमृतः, आत्मचरित उद्विग्नं मम मनः व्रते तस्थौ. ॥ ८४ ॥

अर्थः—पछी अग्निथी तपेलो पारो जेम जलमां अमृतरूप थाय छे, तेम मारां (दुष्ट) आचरणोथी उद्वेग पामेलुं मारु मन चारित्र (लेवामां) स्थिर थयुं छे. ॥ ८४ ॥

पापतापच्छिदे देहि देहिनो मे व्रतामृतम् । इत्थमभ्यर्थितात्यर्थं सुव्रता मामवीवदत् ॥ ८५ ॥

अन्वयः–देहिनो मे पाप ताप च्छिदे व्रत अमृतं देहि? इत्थं अत्यर्थं अभ्यर्थिता सुव्रता मां अवीवदत्. ॥ ८५ ॥

अर्थः–देहधारी एवी जे हुं, तेनां पापोरूपी तापने नाश करवा माटे ( तमो ) चारित्ररूपी अमृत आपो ? एम घणीज प्रार्थना करवाथी ते सुव्रता साध्वीए ( मने ) कह्युं के, ॥ ८५ ॥

भाग्यवत्यसि भद्रे त्वं तत्त्वज्ञश्चेतनस्तव । कर्मद्रुमभिदे वज्रं ययाचे यत्त्वया व्रतम् ॥ ८६ ॥

अन्वयः–( हे ) भद्रे ! त्वं भाग्यवती असि, तव चेतनः तत्त्वज्ञः, यत् त्वया कर्म द्रुम भिदे वज्रं व्रतं ययाचे. ॥ ८६ ॥

अर्थः–हे भद्रे ! तुं भाग्यशाली छो, तथा तारो आत्मा तत्त्वोनो जाणकार छे, के जेथी तें कर्मोरूपी वृक्षोने तोडी पाडवा माटे वज्रसरखां चारित्रनी मागणी करी छे. ॥ ८६ ॥

किं तु मे गुरवः सन्ति श्रीशीलप्रभसूरयः। लीलोद्यानतटेऽभ्येत्य तदभ्यर्णे व्रतं भज ॥ ८७ ॥

अन्वयः—किं तु लीला उद्यान तटे मे श्रीशीलप्रभसूरयः गुरवः संति, अभ्येत्य तदभ्यर्णे व्रतं भज? ॥ ८७ ॥

अर्थः—परंतु क्रीडा करवाना उद्यानपासे मारा श्रीशीलप्रभसूरि नामना गुरुमहाराज छे, (त्यां) आवी तेमनी पासे तुं चारित्र ले?

इत्युक्ताहं तया हन्त तवान्तिकमिहागमम्। ममापराधः सोढव्योऽनुमन्यस्व व्रताय माम् ॥ ८८ ॥

अन्वयः—इति तया उक्ता अहं हंत इह तव अंतिकं आगमं, मम अपराधः सोढव्यः, मां व्रताय अनुमन्यस्व? ॥ ८८ ॥

अर्थः—एम तेणीए कह्याथी अरेरे! हुं अहीं तारी पासे आवी छुं, मारा अपराधनी क्षमा करवी, तथा मने चारित्र लेवामाटे तुं आज्ञा आप? ॥ ८८ ॥

एवं निशम्य रम्यार्थं वचः सचिवसंभवः। दध्यावुत्तुङ्गवैराग्यतरङ्गच्छन्नमानसः ॥ ८९ ॥

अन्वयः—एवं रम्य अर्थ वचः निशम्य उत्तुंग वैराग्य तरंग च्छन्न मानसः सचिव संभवः दध्यौ. ॥ ८९ ॥

अर्थः—एरीते मनोहर भावार्थवाळुं वचन सांभळीने वैराग्यना मोजांओथी आच्छादित थयेलां हृदयवाळो ते मंत्रिपुत्र विचारवा लाग्यो के, ॥ ८९ ॥

अहह प्रहतज्ञानह्रीयशोभययामिकैः। विषयैर्मुषितं मेऽद्य तस्करैः सुकृतं धनम् ॥ ९० ॥

अन्वयः—अहह ! प्रहत ज्ञान ह्री यशः भय यामिकैः विषयैः तस्करैः अद्य मे सुकृतं धनं मुषितं. ॥ ९० ॥

अर्थः—अरेरे ! हणेला छे ज्ञान, लज्जा, यश तथा भयरूपी चोकीदारोने जेओए, एवा विषयोरूपी चोरोए आजे मारुं पुण्यरूपी द्रव्य लुंटी लीधुं छे. ॥ ९० ॥

**तानेव पुरुषान्मन्ये न येषां विषमेषुणा । स्त्रीविभ्रमेषुभिर्भित्वा चित्तं धृतिरगृह्यत ॥ ९१ ॥**

अन्वयः-विषम इषुणा स्त्री विभ्रम इषुभिः चित्तं भित्वा येषां धृतिः न अगृह्यत, तान् एव पुरुषान् मन्ये. ॥ ९१ ॥

अर्थः-कामदेवे स्त्रीना विलासरूपी बाणोवडे हृदयने भेदीने जेओनुं धैर्य लुंटी लीधुं नथी, तेओनेज (खरेखरा) पुरुषो हुं मानुं छुं.

**सुव्रताया व्रतस्याहो माहात्म्यमभवत्कियत् । यदेवं मुदिता देवी वितनोति प्रभावनाम् ॥ ९२ ॥**

अन्वयः-अहो ! सुव्रतायाः व्रतस्य कियत् माहात्म्यं अभवत् ! यत् एवं मुदिता देवी प्रभावनां वितनोति. ॥ ९२ ॥

अर्थः-अहो ! (ते) सुव्रतासाध्वीना व्रतनुं केटलुं माहात्म्य (प्रगट) थयुं ! के आवी रीते खुशी थयेली देवीए (जेणीनी) प्रभावना करी.

**ततः स्वस्य व्रतिन्याश्चाब्रह्मणो ब्रह्मणोऽन्तरम् । विज्ञाय स्यान्ममादातुं साम्प्रतं साम्प्रतं व्रतम् ॥९३॥**

अन्वयः-ततः स्वस्य अब्रह्मणः च व्रतिन्याः ब्रह्मणः अंतरं विज्ञाय सांप्रतं मम व्रतं आदातुं सांप्रतं स्यात्. ॥ ९३ ॥

अर्थः—तेथी मारां लंपटपणा अने ते साध्वीना ब्रह्मचर्यवचेनुं अंतर जाणीने हवे तो मारे चारित्र लेवुं योग्य छे. ॥ ९४ ॥

**किं चैतत्कुर्वतः स्यान्मे मुखच्छविरिहोज्ज्वला । अमुत्र च भवे भद्रं भूरिभाग्यभवं भवेत् ॥ ९४ ॥**

अन्वयः—किं च एतत् कुर्वतः इह मे मुखच्छविः उज्ज्वला स्यात्, च अमुत्र भवे भूरि भाग्य भवं भद्रं भवेत्. ॥ ९४ ॥

अर्थः—वळी नेम कर्याथी आ लोकमां मारा मुखनी कांति उज्ज्वल रहेशे, तथा परभवमां (पण) घणां भाग्योनी उत्पत्तिवाळुं (मारुं) कल्याण थशे. ॥ ९५ ॥

**एवं चित्ते स निश्चित्य कृत्यं कात्यायनीं जगौ । स्वाभिप्रायं वदन्त्याम्ब त्वयाहं साधु बोधितः ॥ ९५ ॥**

अन्वयः—एवं कृत्यं चित्ते निश्चित्य सः कात्यायनीं जगौ, (हे) अंब! स्वअभिप्रायं वदंत्या त्वया अहं साधु बोधितः.॥९५॥

अर्थः—एवीरीतना कार्यमाटेनो मनमां निश्चय करीने ते श्रीषेणे ते कुटणीने कह्युं के, हे माताजी! आपनो आशय जणावीने आपे मने ठीक प्रतिबोध आप्यो. ॥ ९५ ॥

**ममाकृत्यकृतः कर्मोन्मूलने मूढचेतसः । उपायं ज्ञापयांचक्रे भवती भवतीरदम् ॥ ९६ ॥**

अन्वयः—अकृत्य कृतः, मूढ चेतसः मम कर्म उन्मूलने भव तीरदं उपायं भवती ज्ञापयां चक्रे. ॥ ९६ ॥

अर्थः—दुष्कार्य करनारो तथा मूढ हृदयवाळो एवो जे हुं, तेनां कर्मोने उखेडी नाखवा माटे, संसारसागरनो पार आपनारो उपाय तमोए मने सूचव्यो छे. ॥ ९६ ॥

**आत्मा प्रमादपर्यङ्के शयानो मोहनिद्रया । कथं जागर्ति चेन्न स्यादुपदेशस्वरः पुरः ॥ ९७ ॥**

अन्वयः—चेत् पुरः उपदेश स्वरः न स्यात्, प्रमाद पर्यंके मोह निद्रया शयानः आत्मा कथं जागर्ति ? ॥ ९७ ॥

अर्थः—जो (आपणी) आगळ उपदेशनो अवाज न थाय, तो प्रमादरूपी पलंगपर मोहनिद्रामां सूतेलो आत्मा क्यांथी जागे?

ततः श्राद्धे त्वया सार्धं श्रद्धया गुरुसंनिधौ । ध्वंसाय स्वापराधस्य ग्रहीष्ये व्रतमार्हतम् ॥ ९८ ॥

अन्वयः—ततः (हे) श्राद्धे! स्व अपराधस्य ध्वंसाय श्रद्धया त्वया सार्धं गुरुसंनिधौ आर्हतं व्रतं ग्रहीष्ये. ॥ ९८ ॥

अर्थः-तेथी (हे) श्राविका! मारा अपराधना नाशमाटे श्रद्धाथी तारीसाथेज गुरुमहाराजपासे (हुं पण) जैन चारित्र ग्रहण करीश.

इति प्रतिज्ञां कृत्वा सोऽग्रतस्तस्या व्रतस्पृहः । आपृच्छयातुच्छविच्छेदकातरौ पितरौ बलात् ॥ ९९ ॥
वन्द्यमानन्द्य तत्त्वज्ञं क्षत्रं मित्रमकृत्रिमम् । संबोध्य बान्धवान्कृत्वा कृतार्थानर्थिनो जनान् ॥ १०० ॥
परिवारपरित्यागं कृत्वा कात्यायनीयुतः । श्रीशीलप्रभसूरीणां संनिधौ व्रतमाददे ॥ १ ॥ त्रिभिर्विशेषकं.

अन्वयः—इति तस्याः अग्रतः प्रतिज्ञां कृत्वा व्रतस्पृहः सः अतुच्छ विच्छेद कातरौ पितरौ बलात् आपृच्छय, ॥ ९९ ॥ वंद्यं, तत्त्वज्ञं, अकृत्रिमं क्षत्रं मित्रं आनंद्य, बांधवान् संबोध्य, अर्थिनः जनान् कृतार्थन् कृत्वा, ॥ १०० ॥ परिवार परित्यागं कृत्वा, कात्यायनीयुतः श्रीशीलप्रभसूरीणां संनिधौ व्रत आददे. ॥ १ ॥ त्रिभिर्विशेषकं ॥

अर्थः—एरीते तेणीनी समक्ष प्रतिज्ञा लेइने, चारित्र लेवानी इच्छावाळा एवा ते श्रीषेणे, अतिविरह थवाने लीधे खेद पामता (पोताना) मातापितानी मुश्केलीथी आज्ञा मेळवीने, ॥ ९९ ॥ तथा नमवालायक, तत्त्वोना जाणकार, अने अंतःकरणथी मित्राइ राखनारा एवा ते क्षत्रीयराजाने खुशी करीने, तथा स्वजनोने समजावीने, अने याचक लोकोने पण (दानथी) कृतार्थ करीने,

॥ १०० ॥ परिवारनो त्याग करी ते कुटणीनी साथे श्रीशीलप्रभआचार्यपासे चारित्र लीधुं. ॥ १ ॥ त्रिभिर्विशेषकं ॥

**विहरन्गुरुभिः सार्धं श्रीषेणः कर्मशोषणः । तपांसि तन्वन्सिद्धान्तं शुद्धान्तःकरणोऽपठत् ॥ २ ॥**

अन्वयः-तपांसि तन्वन् कर्मशोषणः श्रीषेणः गुरुभिः सार्धं विहरन् शुद्ध अंतःकरणः सिद्धांतं अपठत्. ॥ २ ॥

अर्थः-(पछी) तप तपी कर्मोने खपावनारा ते श्रीषेणमुनि गुरुसाथे विचरताथका निर्मल हृदयथी आगमोनो अभ्यास करवा लाग्या.

**काले कियत्यपि क्रान्ते गुर्वादेशमवाप्य सः । इहैव स्थण्डिले तस्थौ शुद्धध्यानरतिर्यतिः ॥ ३ ॥**

अन्वयः-कियति अपि काले क्रांते गुरु आदेशं अवाप्य शुद्ध ध्यान रतिः सः यतिः इह एव स्थंडिले तस्थौ. ॥ ३ ॥

अर्थः—केटलोक समय वीत्याबाद गुरुमहाराजनी आज्ञा मेळवीने निर्मल ध्यानमां लीन थइने ते श्रीषेणमुनि अहींज शुद्ध भूमिपर स्थिर रह्या. ॥ ३ ॥

**दृष्टब्रह्मानुभावापि रोहितातुच्छमोहिता । श्रीषेणे नात्यजत्कामं स्नेहबन्धो हि दुस्त्यजः ॥ ४ ॥**

अन्वयः-दृष्ट ब्रह्म अनुभावा अपि श्रीषेणे अतुच्छमोहिता रोहिता कामं न अत्यजत्, हि स्नेहबंधः दुस्त्यजः. ॥ ४ ॥

अर्थः—ब्रह्मचर्यनो प्रभाव जोवा छतां पण श्रीषेणप्रते अति मोहित थयेली रोहिताए कामवासना तजी नही, केमके स्नेहनुं बंधन तजवुं मुश्केल छे. ॥ ४ ॥

**पत्युरावर्जनायासौ तन्वती गृहिणां व्रतम् । अक्षीणरागा क्षोणाङ्गी मृत्वाभूद्व्यन्तरी वरा ॥ ५ ॥**

अन्वयः–पत्युः आवर्जनाय गृहिणां व्रतं तन्वती असौ, अक्षीण रागा, क्षीण अंगी मृत्वा वरा व्यंतरी अभूत्. ॥ ५ ॥

अर्थः—( पोताना ) स्वामीने खुशी करवामाटे गृहस्थीनुं व्रत पाळती एवी ते रोहिता ( श्रीषेणपरनो ) मोह न तजवाथी दुर्बळ थइ थकी मरण पामीने उत्तम व्यंतरी थइ. ॥ ५ ॥

अवधिज्ञानतो ज्ञात्वा तं मुनिं स्थानकेऽत्र सा । आगमत्प्राग्भवप्रेमपूरपूरितमानसा ॥ ६ ॥

अन्वयः–अवधि ज्ञानतः तं मुनिं अत्र स्थानके ज्ञात्वा प्राग्भव प्रेम पूर पूरित मानसा सा आगमत्. ॥ ६ ॥

अर्थः–अवधिज्ञानथी ते मुनिने आ जगोए ( रहेला ) जाणीने, पूर्वभवना प्रेमना समूहथी भरेलां हृदयवाळी ते व्यंतरी आवी.

हावैः प्रीतिगिरां भावैर्व्यन्तर्योपद्रुतोऽपि सः । नाचलद्ध्यानतो दन्तिदन्तघातैरिवाचलः ॥ ७ ॥

अन्वयः–हावैः प्रीतिगिरां भावैः व्यंतर्या उपद्रुतः अपि सः दंति दंत घातैः अचलः इव ध्यानतः न अचलत्. ॥ ७ ॥

अर्थः—प्रेमयुक्त वचनोना हावभावोवडे ते व्यंतरीए ( अनुकूल ) उपद्रव कर्या छतां पण ते श्रीषेणमुनि, हाथीना दंतघातोवडे पर्वतनीपेठे ध्यानथी चलायमान थया नही. ॥ ७ ॥

किं त्वस्य क्षपकश्रेण्यामारूढस्य मुनीशितुः । केवलज्ञानमुत्पेदे विच्छेदे घातिकर्मणाम् ॥ ८ ॥

अन्वयः—किंतु क्षपक श्रेण्यां आरूढस्य अस्य मुनीशितुः घातिकर्मणां विच्छेदे केवलज्ञानं उत्पेदे. ॥ ८ ॥

अर्थः—परंतु क्षपकश्रेणिपर चडेला ते मुनिराजने घातिकर्मोना नाशथी केवलज्ञान उत्पन्न थयुं. ॥ ८ ॥

तन्मत्वा व्यन्तरी मुक्तमोहा भक्तिमिमां व्यधात् । सुगन्धानिलहेमाब्जरत्नसिंहासनादिकाम् ॥ ९ ॥

अन्वयः-तत् मत्वा मुक्तमोहा व्यंतरी सुगंध अनिल हेम अब्ज रत्न सिंहासन आदिकां इमां भक्तिं व्यधात्. ॥ ९ ॥

अर्थः-ते जाणीने मोहने तजी ते व्यंतरीए सुगंधी वायु, सुवर्णनुं कमल, तथा रत्नना सिंहासन आदिकनी आ भक्ति करेली छे

जाते च निर्विषे नागे व्योम्नि वाग्निर्ममेऽनया । भवेत्प्रभावनायां हि सम्यग्दृष्टेरभीष्टता ॥ १० ॥

अन्वयः—च नागे निर्विषे जाते अनया व्योम्नि वाग् निर्ममे, हि प्रभावनायां सम्यग्दृष्टेः अभीष्टता भवेत्. ॥ १० ॥

अर्थः—वळी ते नागकौटुंबीनुं झेर उतरी गयाबाद आ व्यंतरीए आकाशवाणी करी, केमके ( धर्मनी ) प्रभावना करवामां सम्यग्दृष्टीदेवने प्रेम होय छे. ॥ १० ॥

॥ इति श्रीपरस्त्रीभोगाभिलाषकटुफलोपदर्शने श्रीषेणचरित्रं समाप्तं. आ चरित्र श्रीवर्धमानसूरिविरचित श्रीवासुपूज्यचरित्रनामना महाकाव्यमांथी स्वपरना श्रेय माटे तेना अन्वय तथा गुजराती भाषांतर सहित जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्युं छे. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजय सुप्रसादात् ॥ श्रीरस्तु ॥

॥ इति श्री श्रीषेणचरित्रं समाप्तं ॥